## सप्तमाध्यायस्य
## तृतीयः पादः

### देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात् । (१/१४३०)

[1]देविका शिंशपा दित्यवाट् दीर्घसत्र श्रेयस् इत्येतेषाम् अङ्गानाम् अचामादेः अचः स्थाने वृद्धिप्रसङ्गे [2]आकारो भवति ञिति, णिति, किति तद्धिते[3] परतः । देविकायां भवमुदकं दाविकमुदकम् । देविकाकूले भवाः शालयः दाविकाकूलाः शालयः । पूर्वदेविका नाम प्राचां ग्रामः, तत्र भवः पूर्वदाविकः । 'प्राचां ग्रामनगराणाम्' (७.३.१४/१४००) इति उत्तरपदवृद्धिः, सापि आकार एव भवति । शिंशपा – शिंशपायाः विकारः चमसः शांशपः चमसः । पलाशादिरयम्, तेन पक्षे अण्, अनुदात्तादिलक्षणो वा अञ् । शिंशपास्थले भवाः शांशपास्थलाः [4]देवाः (म. भा. ३. ३१६) । पूर्वशिंशपा नाम प्राचां ग्रामः, तत्र भवः पूर्वशांशपः । दित्यवाट् – दित्यौहः इदम् दात्यौहम् । दीर्घसत्र – दीर्घसत्रे भवम् दार्घसत्रम् । श्रेयस् – श्रेयसि भवम् श्रायसम् ।

[८४१] वहीनरस्येद्वचनं कर्तव्यम् । (म. भा. ३.३१७)

[5]वृद्धिविषयेऽचामादेः अचः स्थाने वहीनरस्य इकारादेशो भवति । वहीनरस्य अपत्यम् वैहीनरिः । केचित् तु विहीनरस्यैव वैहीनरिम् इच्छन्ति ॥

### केकयमित्रयुप्रलयानां यादेरियः । (२/११४४)

केकय मित्रयु प्रलय इत्येतेषां यकारादेः इय इत्ययमादेशो भवति [6]तद्धिते ञिति, णिति, किति च परतः । केकयस्य अपत्यम् कैकेयः । 'जनपदशब्दात् क्षत्रियादञ्' (४.१.१६८/११८६) इति अञ् प्रत्ययः । मित्रयुभावेन श्लाघते मैत्रेयिकया श्लाघते । 'गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु' (५.१.१३४/१७९९) इति वुञ् । लौकिकं हि तत्र गोत्रं गृह्यते । लोके च ऋषिशब्दो गोत्रम् इत्यभिधीयते । प्रलय – प्रलयात् आगतम् प्रालेयम् उदकम् ॥

### न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच् । (३/१००८)

यकारवकाराभ्या[7]मुत्तरस्य अचामादेः अचः स्थाने वृद्धिर्न भवति, ताभ्यां तु यकारवकाराभ्यां [8]पूर्वम् ऐजागमौ भवतः ञिति, णिति, किति च तद्धिते परतः । यकारात् ऐकारः, वकारात् औकारः । व्यसने भवम् वैयसनम् । व्याकरणमधीते[9] वैयाकरणः । स्वश्वस्य अपत्यम् सौवश्वः । य्वाभ्याम् इति किम् ? न्नर्थस्यापत्यम् न्नार्थिः[10] । पदान्ताभ्याम् इति किम् ? यष्टिः प्रहरणमस्य याष्टीकः । यतः[11] छात्राः याताः[12] (म. भा. ३.३१८)। प्रतिषेधवचनमैचोर्विषय[13]प्रक्लृप्त्यर्थम् । इह मा भूत्, दाध्यश्विः, माध्वश्विः इति । नह्यत्र य्वाभ्यामुत्तरस्य

1. तद्धितेषु ञिति णिति किति च अनुवर्तन्ते इत्यधिकम् क. 2. आकारादेशः क. 3. प्रत्यये इत्यधिकम् क. इ. 4. शालयः क. 5. वृद्धिप्रसङ्गे क. 6. तद्धितशब्दानां परतः ब. 7. पदान्ताभ्याम् इत्यधिकम् क. इ. ड, पदाभ्याम् इत्यधिकम् ब. 8. पूर्वौ एव आगमौ क, पूर्वम् ऐजागमो भवति इ. ह. 9. वेत्ति वा इत्यधिकम् क. ह. 10. अतो इञ् इत्यधिकम् ब. 11. इमे इत्यधिकम् इ. 12. छात्राः क. 13. प्रवृत्त्यर्थम् ह.